# परधर्मः भयावहः

कस्यचित् रजकस्य गृहे गर्दभः कुक्कुरश्च अभवताम्। कस्यांचित् रात्रौ केचित् चोराः तस्य रजकस्य गृहं अविशन्। तान् कुक्कुरः गर्दभश्च अपश्यताम्। कुक्कुरः भषणं अकृत्वा तूष्णीं अभवत्। तं दृष्ट्वा गर्दभ ः आह- “मित्र, चोराः स्वामिनः गृहं प्रविशन्ति। कुतः त्वं तूष्णीं तिष्ठसि?” इति।

कुक्कुरः प्रत्यवदत् ;- “विशन्तु ते यथेच्छम्। अयं कथं स्वामी? मह्यं पर्याप्तं अन्नं न यच्छति। प्रत्युत पदे पदे ताडयति” इति।

एतत् प्रत्युत्तरं असहमानः स गर्दभः, स्वामिनं उत्थापयितुं उच्चैः अक्रोशत्। अनेन गर्दभस्वरेण भीताः चोराः झटिति तस्मात् गृहात् बहिः पलायामासुः। सुखसुप्तः रजकः रासभरावेण निद्राभङ्गं प्राप।

स उत्थाय यदा गृहं परितः पश्यति तदा रासभ एव तत्र तिष्ठति स्म। सः अतिक्रोधेन स्वनिद्राभङ्गकारिणं तं रासभं महता लगुडेन शिरसि अताडयत्। पश्यत! अपरिचितजनप्रवेशं दृष्ट्वा भषणं कुक्कुरस्य कर्म, न गर्दभस्य। यतः गदर्भः अन्यकर्म कृतवान् अतः दण्डाहतिं अन्वभवत्।